This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M-2317 विषय

नाव आश्वलायन गृह्यसूत्र (मुद्रित)

लेखक / लिपीकार

पृठ 17 काळ इ. स. 1915 पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथाश्वलायनगृह्यसूत्रप्रारंभः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः ॥ हरिः ॐ३म् ॥ उक्तानिवैतानिकानिगृह्याणिवक्ष्यामस्त्रयःपाकयज्ञाहुताअग्नौहूयमानाअनग्नौप्र
हुताब्राह्मणभोजनेब्रह्मणिहुताअथाप्यृचउदाहरंतियःसमिधायआहुतींयोवेदेनेतिसमिधमेवापिश्रद्दधानआदधन्मन्ये
तयजइदमितिनमस्तस्मैयआहुत्यायोवेदेनेतिविद्ययैवाप्यस्तिप्रीतिस्तदेतत्पश्यन्नृषिरुवाच ॥ अगोरुधायगविषेद्युक्षाय
दस्म्यंवचः ॥ घृतात्स्वादीयोमधुनश्चवोचतेतिवचएवमइदंघृताच्चमधुनश्चस्वादीयोस्तिप्रीतिःस्वादीयोस्त्वित्येवतदा
ह ॥ आतेअग्नऋचाहविर्हृदातष्टंभरामसि ॥ तत्तेभवंतूक्षणऋषभासोवशाउतेत्येतएवमउक्षाणश्चऋषभाश्चवशाश्चभवं
तियइमंस्वाध्यायमधीयतइतियोनमसास्वध्वरइतिनमस्कारेणवैखल्वपिनवैदेवानमस्कारमतियज्ञोवैनमइतिहिब्राह्म
णंभवति ॥ १ ॥ अथसायंप्रातःसिद्धस्यहविष्यस्यजुहुयादग्निहोत्रदेवताभ्यःसोमायवनस्पतयेग्नीषोमाभ्यामिंद्राग्नि
भ्यांद्यावापृथिवीभ्यांधन्वंतरयइंद्रायविश्वेभ्योदेवेभ्योब्रह्मणेस्वाहेत्यथबलिहरणमेताभ्यश्चैवदेवताभ्योद्ध्यओषधिवन
स्पतिभ्योगृहायगृहदेवताभ्योवास्तुदेवताभ्यइंद्रायेंद्रपुरुषेभ्योयमाययमपुरुषेभ्योवरुणायवरुणपुरुषेभ्यःसोमायसो
मपुरुषेभ्यइतिप्रतिदिशंब्रह्मणेब्रह्मपुरुषेभ्यइतिमध्येविश्वेभ्योदेवेभ्यःसर्वेभ्योभूतेभ्योदिवाचारिभ्यइतिदिवानक्तंचा

१ सौत्रमंत्राणांत्रैस्वर्ये नसंप्रदायस्थेमा बहुलंविपर्यासोपलंभात् । अतस्तएकश्रुत्यैवपठितुंयुक्ताः । अथापित्रिस्वरीरसिका यथात्रानुकुर्वन्तितथादर्शितम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिभ्यइतिनक्तंरक्षोभ्यइत्युत्तरतः स्वधापितृभ्यइतिप्राचीनावीतीशेषंदक्षिणानिनयेत् ॥ २ ॥ [अथगृहबलिदेवता नांकीर्तयिष्यामोयत्रयत्रवसंतिते ॥ द्वारेपितामहंविंद्यात्प्रक्रीळेचउमापतिं ॥ आग्नेय्यांबलभद्रंचयमंविष्णुंचदक्षिणे ॥ नैर्ऋत्यांस्कंदवरुणंचसोमंसूर्यंचपश्चिमे ॥ वायव्यामश्विनौवसवःसोमोरुद्रउत्तरस्यांदिशि ॥ ईशान्यांनक्षत्राणींद्रगृहाः पूर्वस्यांदिशि . ॥ गृहमध्येब्रह्माणंप्रतिष्ठाप्यर्ऋद्धिर्वृद्धिःश्रियाकीर्तिरिति ॥ (प्रदक्षिणंनिष्क्रम्यगृहनिवेशनांतस्यंप्रा गुदङ्प्रोक्ष्यबलिंनिवेदयेत् ॥) ततःस्मार्तबलित्रयंगृहांगणेदेयंविहितं ॥ येभूताःप्रचरंतिदिवानक्तंबलिमिच्छंतोवितु दस्यप्रेष्ठाः ॥ तेभ्योबलिंपुष्टिकामोददामिमयिपुष्टिंपुष्टिपतिर्ददातुस्वाहा ॥ ऐंद्रवारुणवायव्यांयाम्यांनैर्ऋतिकाश्च ये ॥ तेकाकाःप्रतिगृह्णंतुभूम्यांपिंडंमयार्पितं ॥ वैवस्वतकुलेजातौद्वौश्यामशबलौशुनौ ॥ ताभ्यांपिंडोमयादत्तोरक्षे तांपथिमांसदा ॥ श्वचांडालभूतपतितवायसेभ्योन्नंभूमौनिक्षिपेत् ॥ यमोसियमदूतोसिवायसोसिनमोस्तुते ॥ सप्त जन्मकृतंपापंबलिंभक्षंतुवायसाः ॥ गोदोहनमात्रंतत्रस्थित्वाऽतिथिमाकांक्षेत् ॥ हस्तौपादौप्रक्षाल्याचम्यगृहंप्रविशे त् ॥ शांतापृथिवीशिवमंतरिक्षंद्यौर्नोदेव्यभयंनोऽअस्तु ॥ शिवादिशःप्रदिशऽउद्दिशोनऽआपोविद्युतःपरिपांतुसर्व तःशांतिःशांतिःशांतिः ॥ इतिपरिशिष्टं ॥] अथखलुयत्रक्वचहोष्यन्त्स्यादिषुमात्रावरंसर्वतःस्थंडिलमुपलिप्योल्लि

१ इदंपरिशिष्टंनप्राचीनकोशेषूपलभ्यते भिन्नभिन्नपाठांतरयुक्तंचयथालब्धंनिवेशितमितिज्ञेयम् । २ विदुरस्यप्रेष्ठाः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ख्यषड्डेखाउदगायतांपश्चात्प्रागायतेनानांतयोस्तिस्रोमध्येतदभ्युक्ष्याग्निंप्रतिष्ठाप्यान्वाधार्यपरिस्तीर्यपुरस्ताद्दक्षिणतः
पश्चादुत्तरतइत्युदक्संस्थंतूष्णींपर्युक्षणंपवित्राभ्यामाज्यस्योत्पवनंमप्रच्छिन्नाग्रावनंतर्गर्भौप्रादेशमात्रौकुशौनानांतयो
र्गृहीत्वांगुष्ठोपकनिष्ठिकाभ्यांमुत्तानाभ्यांपाणिभ्यांसवितुष्ट्वाप्रसवउत्पुनाम्यच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिरिति
प्रागुत्पुनातिसकृन्मंत्रेणद्विस्तूष्णींकृताकृतमाज्यहोमेषुपरिस्तरणंतथाज्यभागौपाकयज्ञेषुब्रह्माचधन्वंतरियज्ञशूलगव
वर्जंममुष्मैस्वाहेतिजुहुयादग्निरिंद्रःप्रजापतिर्विश्वेदेवाब्रह्मेत्यनादेशंएकबर्हिरिध्माज्यस्विष्टकृतःस्युस्तुल्यकालास्तदे
षाभियज्ञगाथागीयते ॥ पाकयज्ञान्त्समासाद्यैकाज्यानेकबर्हिषः ॥ एकःस्विष्टकृतःकुर्यान्नानापिसतिदैवतइति ॥३॥
उदगयनआपूर्यमाणपक्षेकल्याणेनक्षत्रेचौलकर्मोपनयनगोदानविवाहाःसार्वकालमेकेविवाहंतेषांपुरस्ताच्चतस्रआज्या
हुतीर्जुहुयादग्नआयूंषिपवसऽइतितिसृभिःप्रजापतेनत्वदेतान्यन्यऽइतिचव्याहृतिभिर्वासमुच्चयमेकेनैकेकांचनत्वमर्य
माभवसियत्कनीनामितिविवाहेचतुर्थी ॥ ४ ॥ कुलमग्रेपरीक्षेतयेमातृतःपितृतश्चेतियथोक्तंपुरस्ताद्बुद्धिमतेकन्यांप्र
यच्छेद्बुद्धिरूपशीललक्षणसंपन्नामरोगामुपयच्छेतदुर्विज्ञेयानिलक्षणान्यष्टौपिंडान्कृत्वाऽऋतमग्रेप्रथमंजज्ञऽऋतेसत्यं
प्रतिष्ठितं ॥ यदियंकुमार्यभिजातातदियमिहप्रतिपद्यतांयत्सत्यंतद्दृश्यतामितिपिंडानभिमंत्र्यकुमारींब्रूयादेषामेकंगृहा
णेतिक्षेत्राच्चेदुभयतःसस्याद्गृह्णीयादन्नवत्यस्याःप्रजाभविष्यतीतिविद्याद्गोष्ठात्पशुमतींवेदिपुरीषाद्ब्रह्मवर्चस्विन्यविदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिनोह्रदात्सर्वसंपन्नादेवनात्कितवींचतुष्पथाद्विप्रव्राजिनींरिणादधन्याश्मशानात्पतिघ्नी ॥ ५ ॥ अलंकृत्यकन्यामु
दकपूर्वांदद्यादेषब्राह्मोविवाहस्तस्यांजातोद्वादशावरान्द्वादशपरान्पुनात्युभयतऋत्विजेविततेकर्मणिदद्यादलंकृत्यसदै
वोदशावरान्दशपरान्पुनात्युभयतःसहधर्मंचरतइतिप्राजापत्योऽष्टावरानष्टपरान्पुनात्युभयतोगोमिथुनंदत्त्वोपयच्छे
तसआर्षःसप्तावरान्त्सप्तपरान्पुनात्युभयतोमिथःसमयंकृत्वोपयच्छेतसगांधर्वोधनेनोपतोष्योपयच्छेतसआसुरःसुप्ता
नांप्रमत्तानांवापहरेत्सपैशाचोहत्वाभित्त्वाचशीर्षाणिरुदतींरुदद्भ्योहरेत्सराक्षसः ॥ ६ ॥ अथखलूच्चावचाजनपदध
र्माग्रामधर्माश्चतान्विवाहेप्रतीयाद्यत्तुसमानंतद्वक्ष्यामःपश्चादग्नेर्दक्षिणमश्मानंप्रतिष्ठाप्योत्तरपुरस्तादुदकुंभंसमन्वार
ब्धायांहुत्वातिष्ठन्प्रत्यङ्मुखःप्राङ्मुख्याआसीनायागृभ्णामितेसौभगत्वायहस्तमित्यंगुष्ठमेवगृह्णीयाद्यदिकामयीतपुमां
सएवमेपुत्राजायेरन्नित्यंगुलीरेवस्त्रीकामोरोमांतेहस्तंसांगुष्ठमुभयकामःप्रदक्षिणमग्निमुदकुंभंचत्रिःपरिणयन्जपत्यमो
हमस्मिसात्वंसात्वमस्यमोहंद्यौरहंपृथिवीत्वंसामाहमृक्त्वंतावेहविवहावहै ॥ प्रजांप्रजनयावहैसंप्रियौरोचिष्णूसुमन
स्यमानौजीवेवशरदःशतमितिपरिणीयपरिणीयाश्मानमारोहयतीममश्मानमारोहाश्मेवत्वंस्थिराभव ॥ सहस्वपृतना
यतोभितिष्ठपृतन्यतइतिवध्वंजलावुपस्तीर्यभ्राताभ्रातृस्थानोवाद्विर्लाजानावपतित्रिर्जामदग्न्यानांप्रत्यभिघार्यहविर
वत्तंचैषोवदानधर्मोऽर्यमणंनुदेवंकन्याअग्निमयक्षत ॥ सइमांदेवोअर्यमाप्रेतोमुंचातुनामुतस्वाहा ॥ वरुणंनुदेवंकन्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्निमयक्षत ॥ सइमांदेवोवरुणःप्रेतोमुंचातुनामुतस्वाहा ॥ पूषणंनुदेवैकन्याऽअग्निमयक्षत ॥ सइमादेवःपूषाप्रेतो
मुंचातुनामुतस्वाहेत्यविच्छिंदत्यंजलिंस्रुचेवजुहुयादपरिणीयशूर्पपुटेनाभ्यात्मंतूष्णींचतुर्थंमोप्योप्यहैकेलाजान्परिण
यन्त्यथोत्तमेआहुतीनसंनिपततोथास्यैशिखेविमुंचतियदिकृतेभवतऊर्णास्तुकेकेशपक्षयोर्बद्धेभवतःप्रत्वामुंचामिवरु
णस्यपाशादित्युत्तरामुत्तरयाथैनामपराजितायांदिशिसप्तपदान्यभ्युत्क्रामयतीषएकपद्यूर्जेद्विपदीरायस्पोषायत्रिपदी
मायोभव्यायचतुष्पदीप्रजाभ्यःपंचपद्यृतुभ्यःषट्पदीसखासप्तपदीभवसामामनुव्रताभव ॥ पुत्रान्विंदावहैबहूंस्तेसंतु
जरदष्टयइत्युभयोःसन्निधायशिरसीउदकुंभेनावसिच्यब्राह्मण्याश्चवृद्धायाजीवपत्याजीवप्रजायाअगारएतांरात्रींवसे
ध्रुवमरुंधतींसप्तऋषीनितिदृष्ट्वावाचंविसृजेतजीवपत्नीप्रजांविंदेयेति ॥ ७ ॥ प्रयाणउपपद्यमानेपूषात्वेतोनयतुहस्तगृह्ये
तियानमारोहयेदश्मन्वतीरीयतेसंरभध्वमित्यर्धर्चेननावमारोहयेदुत्तरेणोत्क्रमयेज्जीवंरुदंतीतिरुदत्यांविवाहाग्निमग्र
तोजस्रंनयंतिकल्याणेषुदेशवृक्षचतुष्पथेषुमाविदन्परिपंथिनइतिजपेद्वासेवासेसुमंगलीरियंवधूरितीक्षकानीक्षेतेहप्रियं
प्रजयातेसमृद्ध्यतामितिगृहंप्रवेशयेद्विवाहाग्निमुपसमाधायपश्चादस्यानडुहंचर्मास्तीर्यप्राग्ग्रीवमुत्तरलोमतस्मिन्नुपवि
ष्टायांसमन्वारब्धायामानःप्रजांजनयतुप्रजापतिरितिचतसृभिःप्रत्यृचंहुत्वासमंजंतुविश्वेदेवाऽइतिदध्नःप्राश्यप्रतिप्र
यच्छेदाज्यशेषेणवानक्तिहृदयेतऊर्ध्वमक्षारालवणाशिनौब्रह्मचारिणावलंकुर्वाणावधःशायिनौस्यातांत्रिरात्रंद्वादशरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रंसंवत्सरंवैकऋषिर्जायतइतिचरितव्रतःसूर्याविदेवधूवस्त्रंदद्यादन्नंब्राह्मणेभ्योऽथस्वस्त्ययनंवाचयीत ॥८॥ पाणिग्रह
णादिगृह्यंपरिचरेत्स्वयंपत्न्यपिवापुत्रःकुमार्यंतेवासीवानित्यानुगृहीतःस्याद्यदितूपशाम्येत्पत्न्युपवसेदित्येकेतस्याग्निहो
त्रेणप्रादुष्करणहोमकालौव्याख्यातौहौम्यंचमांसवर्जंकामंतुव्रीहियवतिलैरग्नयेस्वाहेतिसायंजुहुयात्सूर्यायस्वाहेतिप्रा
तस्तूष्णींद्वितीयेउभयत्र ॥९॥ अथपार्वणस्थालीपाकस्तस्यदर्शपूर्णमासाभ्यामुपवासइध्माबर्हिषोश्चसंनहनंदेवताश्चोपां
शुयाजेंद्रमाहेंद्रवर्जंकाम्याइतरास्तस्यैतस्यैदेवतायैचतुरश्चतुरोमुष्टीन्निर्वपतिपवित्रेअंतर्धायामुष्मैत्वाजुष्टंनिर्वपामीत्यथै
नान्प्रोक्षतियथानिरुप्तममुष्मैत्वाजुष्टंप्रोक्षामीत्यवहतांस्त्रिःफलीकृतान्नानाश्रपयेत्समोप्यवायदिनानाश्रपयेद्विभज्यतं
डुलानभिमृशेदिदममुष्माइदममुष्माइतियद्युवैसमोप्यव्युद्धारंजुहुयाच्छृतानिहवींष्यभिघार्योदगुद्वास्यबर्हिष्यासाद्य
प्रत्यभिघार्येध्मममिघार्यायंतइध्मआत्माजातवेदस्तेनेध्यस्ववर्धस्वचेद्धवर्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येन
समेधयस्वाहेतितूष्णीमाघारावाघार्याज्यभागौजुहुयादग्नयेस्वाहासोमायस्वाहेत्युत्तरमाग्नेयंदक्षिणंसौम्यंविज्ञायतेचक्षु
षीवाएतेयज्ञस्ययदाज्यभागौतस्मात्पुरुषस्यप्रत्यङ्मुखस्यासीनस्यदक्षिणमक्ष्युत्तरंभवत्युत्तरंदक्षिणंमध्येहवींषिप्रत्यक्तरं
वाप्राक्संस्थान्युदक्संस्थानिवोत्तरपुरस्तात्सौविष्टकृतंमध्यात्पूर्वार्धाच्चहविषोवद्यतिमध्यात्पूर्वार्धात्पश्चार्धादितिपंचाव
त्तिनामुत्तरार्धात्सौविष्टकृतंनात्रहवींषिप्रत्यभिघारयतिस्विष्टकृतंद्विरभिघारयतियदस्यकर्मणोत्यरीरिचंयद्वान्यूनमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हाकारं ॥ अग्निष्टत्स्विष्टकृद्विद्वान्त्सर्वंस्विष्टंसुहुतंकरोतुमे ॥ अग्नयेस्विष्टकृतेसुहुतहुतेसर्वप्रायश्चित्ताहुतीनांकामानांसम
र्धयित्रेसर्वान्नःकामान्समर्धयस्वाहेतिबर्हिषिपूर्णपात्रंनिनयेदेषोवभृथःपाकयज्ञानामेतत्तंत्रंहविरुच्छिष्टंदक्षिणा ॥१०॥
अथपशुकल्पउत्तरतोग्नेःशामित्रस्यायतनंकृत्वापाययित्वापशुमाप्लाव्यपुरस्तात्प्रत्यङ्मुखमवस्थाप्याग्निंदूतमितिद्वाभ्यां
हुत्वासपलाशयार्द्रशाखयापश्चादुपस्पृशेदमुष्मैत्वाजुष्टमुपाकरोमीतिव्रीहियवमतीभिरद्भिःपुरस्तात्प्रोक्षत्यमुष्मैत्वाजुष्टं
प्रोक्षामीतितासांपाययित्वादक्षिणमनुबाहुंशेषंनिनयेदावृतैवपर्यग्निकृत्वोदंचंनयंतितस्यपुरस्तादुल्मुकंहरंतिशामित्रए
षभवतिवपाश्रपणीभ्यांकर्तापशुमन्वारभतेकर्तारंयजमानःपश्चाच्छामित्रस्यप्राक्शिरसंप्रत्यक्शिरसंवोदक्पादंसंज्ञप्य
पुरानाभेस्तृणमंतर्धायवपामुत्खिद्यवपामवदायवपाश्रपणीभ्यांपरिगृह्याद्भिरभिषिच्यशामित्रेप्रताप्याग्रेणैनमग्निंहृत्वा
दक्षिणतआसीनःश्रपयित्वापरीत्यजुहुयादेतस्मिन्नेवाग्नौस्थालीपाकंश्रपयत्येकादशपशोरवदानानिसर्वांगेभ्योवदायशा
मित्रेश्रपयित्वाहृदयंशूलेप्रताप्यस्थालीपाकस्याग्रतोजुहुयादवदानैर्वासहैकैकस्यावदानस्यद्विर्द्विरवद्यत्यावृतैवहृदयशू
लेनचरंति ॥ ११ ॥ चैत्ययज्ञेप्राक्स्विष्टकृतश्चैत्यायबलिंहरेद्यद्युवैविदेशस्थंपलाशदूतेनयत्रवेत्थवनस्पतइत्येतयर्चाद्वौ
पिंडौकृत्वावीवधेभ्याधायदूतायप्रयच्छेदिमंतस्मैबलिंहरेतिचैनंब्रूयादयंतुभ्यमितियोदूतायप्रतिभयंचेदंतराशस्त्रमपि
किंचिन्नाव्याचेन्नद्यंतरांप्लवरूपमपिकिंचिदनेनतरितव्यमितिधन्वंतरियज्ञेब्रह्माणमग्निंचांतरापुरोहितायाग्रेबलिंहरेत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ १२ ॥ उपनिषदिगर्भलंभनंपुंसवनमनवलोभनंचयदिनाधीयात्तृतीयेगर्भमासेतिष्येणोपोषितायाःसरूपवत्सायागो
र्दधनिद्वौद्वौतुमाषौयवंचदधिप्रसृतेनप्राशयेत्किंपिबसिकिंपिबसीतिपृष्ट्वापुंसवनंपुंसवनमितित्रिःप्रतिजानीयादेवंत्री
न्प्रसृतानथास्यैमंडलागारच्छायायादक्षिणस्यांनासिकायामजीतामोषधींनस्तःकरोतिप्रजावज्जीवपुत्राभ्यांहैके ॥ आ
तेगर्भोयोनिमैतुपुमान्बाणइवेषुधिं ॥ आवीरोजायतांपुत्रस्तेदशमास्यः ॥ अग्निरेतुप्रथमोदेवतानांसोस्यैप्रजांमुंचतुमृ
त्युपाशात् ॥ तदयंराजावरुणोनुमन्यतांयथेयंस्त्रीपौत्रमघंनरोदादितिप्राजापत्यस्यस्थालीपाकस्यहुत्वाहृदयदेशमस्या
आलभेतयत्तेसुशीमेहृदयेहितमंतःप्रजापतौ ॥ मन्येहंमांतद्विद्वांसंमाहंपौत्रमघंनियामिति ॥ १३ ॥ चतुर्थेगर्भमासे
सीमन्तोन्नयनंमापूर्यमाणपक्षेयदापुंसानक्षत्रेणचंद्रमायुक्तःस्यादथाग्निमुपसमाधायपश्चादस्यानडुहंचर्मास्तीर्यप्राग्ग्री
वमुत्तरलोमतस्मिन्नुपविष्टायांसमन्वारब्धायांधाताददातुदाशुषइतिद्वाभ्यांराकामहमितिद्वाभ्यांनेजमेषप्रजापतेनत्व
देतान्यन्यइतिचाथास्यैयुग्मेनशलाटुग्लप्सेनत्र्येण्याचशलल्यात्रिभिश्चकुशपिंजूलैरूर्ध्वंसीमंतंव्यूहतिभूर्भुवःस्वरो ३
मितित्रिश्चतुर्वावीणागाथिनौसंशास्तिसोमंराजानंसंगायेतामितिसोमोनोराजावतुमानुषीःप्रजानिविष्टचक्रासाविति
यांनदीमुपवसिताभवंतिब्राह्मण्यश्चवृद्धाजीवपत्योजीवप्रजायद्यदुपदिशेयुस्तत्तत्कुर्युर्ऋषभोदक्षिणा ॥ १४ ॥ कुमारं
जातंपुरान्यैरालंभास्सर्पिर्मधुनीहिरण्यनिकाषंहिरण्येनप्राशयेत्प्रतेददामिमधुनोघृतस्यवेदंसवित्राप्रसूतंमघोनां ॥ आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युष्मान्गुप्तोदेवताभिःशतंजीवशरदोलोकेअस्मिन्नितिकर्णयोरुपनिधायमेधाजननंजपतिमेधांतेदेवःसवितामेधांदेवी
सरस्वती ॥ मेधांतेऽअश्विनौदेवावाधत्तांपुष्करस्रजाविति्यंसावभिमृशत्यश्मभवपरशुर्भवहिरण्यमस्तृतंभव ॥ वेदो
वैपुत्रनामासिसजीवशरदःशतमिति(दक्षिणंस्तनंप्रक्षाल्यहिरण्योदकेनेमांकुमारोजरांधयतुदीर्घमायुःप्रजीवसे ॥ अस्यै
स्तनौप्रयुंजानाआयुर्वर्चोयशोबलमितिदक्षिणंस्तनंप्रदायें)द्रश्रेष्ठानिद्रविणानिधेह्यस्मेप्रयंधिमघवन्नृजीषिन्नितिचनाम
चास्मैदद्युर्घोषवदाद्यंतरंतस्थमभिनिष्ठानांतंद्व्यक्षरंचतुरक्षरंवाद्व्यक्षरंप्रतिष्ठाकामश्चतुरक्षरंब्रह्मवर्चसकामोयुग्मानित्वेव
पुंसामयुग्मानिस्त्रीणामभिवादनीयंचसमीक्षेततन्मातापितरौविद्यातामोपनयनात्प्रवासादेत्यपुत्रस्यशिरःपरिगृह्यजप
त्यंगादंगात्संभवसिहृदयादधिजायसे ॥ आत्मावैपुत्रनामासिसजीवशरदःशतमितिमूर्धनित्रिरवघ्रायावृतैवकुमार्यै
॥ १५ ॥ षष्ठेमास्यन्नप्राशनंमाजमन्नाद्यकामस्तैत्तिरंब्रह्मवर्चसकामोघृतौदनंतेजस्कामो (दध्योदनमिंद्रियकामःक्षीरो
दनंपशुकामो) दधिमधुघृतमिश्रमन्नंप्राशयेदन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः ॥ प्रप्रदातारंतारिषऽऊर्जनोधेहि
द्विपदेचतुष्पदइत्यावृतैवकुमार्यै ॥ १६ ॥ तृतीयेवर्षेचौलंयथाकुलधर्मवोत्तरतोग्नेर्व्रीहियवमाषतिलानांपृथक्पूर्णश
रावाणिनिदधातिपश्चात्कारयिष्यमाणोमातुरुपस्थआनडुहंगोमयंनवेशरावेशमीपर्णानिचोपनिहितानिभवंतिमातुःपि

१ धनुश्चिह्नगतोभागःक्वचिन्नास्ति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तादक्षिणतएकविंशतिकुशपिंजूलान्यादायब्रह्मावैतानिधारयेत्पश्चात्कारयिष्यमाणस्यावस्थायंशीतोष्णाअपःसमानी
योष्णेनवायउदकेनेहीतितासांगृहीत्वानवनीतंदधिद्रप्सान्वाप्रदक्षिणंशिरस्त्रिरुंदत्यदितिःकेशान्वपत्वापउंदंतुवर्चसइ
तिदक्षिणेकेशपक्षेत्रीणित्रीणिकुशपिंजूलान्यभ्यात्माग्राणिनिदधात्योषधेत्रायस्वैनंस्वधितेमैनंहिंसीरितिनिष्पीड्यलौहे
नक्षुरेणप्रच्छिनत्तियेनावपत्सविताक्षुरेणसोमस्यराज्ञोवरुणस्यविद्वान् ॥ तेनब्रह्माणोवपतेदमस्यायुष्मान्जरदष्टिर्यथा
सदितिप्रच्छिद्यप्रच्छिद्यप्रागग्रान्छमीपर्णैःसहमात्रेप्रयच्छतितानानडुहेगोमयेनिदधाति ॥ येनधाताबृहस्पतेरग्नेरिंद्रस्य
चायुषेवपत् ॥ तेनतआयुषेवपामिसुश्लोक्यायस्वस्तयऽइतिद्वितीयंयेनभूयश्चरात्र्याज्योक्कपश्यातिसूर्यं ॥ तेनतऽआ
युषेवपामिसुश्लोक्यायस्वस्तयइतितृतीयंसर्वैर्मंत्रैश्चतुर्थमेवमुत्तरतस्त्रिःक्षुरतेजोनिमृजेद्यत्क्षुरेणमर्चयतासुपेशसावसात्र
पसिकेशान् ॥ शुंधिशिरोमास्यायुःप्रमोषीरितिनापितंशिष्याच्छीतोष्णाभिरद्भिरबर्थंकुर्वाणोक्षण्वन्कुशलीकुर्वितिय
थाकुलधर्मंकेशवेशान्कारयेदावृतैवकुमार्यै ॥१७॥ एतेनगोदानंषोडशेवर्षेकेशशब्देतुश्मश्रुशब्दान्कारयेच्छमश्रूणीहों
दतिशुंधिशिरोमुखंमास्यायुःप्रमोषीरितिकेशश्मश्रुलोमनखान्युदकसंस्थानिकुर्वितिसंप्रेष्यत्याप्लुत्यवाग्यतःस्थित्वाहः
शेषमाचार्यसकाशेवाचंविसृजेतवरंददामीतिगोमिथुनंदक्षिणासंवत्सरमादिशेत् ॥ १८ ॥ अष्टमेवर्षेब्राह्मणमुपनयें

१ प्राशयेदित्युत्तरं 'सार्वकामोभवतीतिविज्ञायते' इतिक्वचिदधिकम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ङ्गर्भाष्टमेवैकादशेक्षत्रियंद्वादशेवैश्यमाषोडशाद्ब्राह्मणस्यानतीतःकालआद्वाविंशात्क्षत्रियस्याचतुर्विंशाद्वैश्यस्यातऊ
र्ध्वंपतितसावित्रीकाभवंतिनैनानुपनयेन्नाध्यापयेन्नयाजयेन्नैभिर्व्यवहरेयुरलंकृतंकुमारंकुशलीकृतशिरसंमहतेनवास
सासंवीतंमैणेयेनवाजिनेनब्राह्मणंरौरवेणक्षत्रियंमाजेनवैश्यंयदिवासांसिवसीरन्रक्तानिवसीरन्काषायंब्राह्मणोमांजिष्ठं
क्षत्रियोहारिद्रंवैश्यस्तेषांमेखलामौंजीब्राह्मणस्यधनुर्ज्याक्षत्रियस्यावीवैश्यस्यतेषांदंडाःपालाशोब्राह्मणस्यौदुंबरःक्षत्रिय
स्यबैल्वोवैश्यस्यकेशसंमितोब्राह्मणस्यललाटसंमितःक्षत्रियस्यप्राणसंमितोवैश्यस्य ॥ १९ ॥ सर्वेवासर्वेषांसमन्वा
रब्धेहुत्वोत्तरतोग्नेःप्राङ्मुखआचार्योपतिष्ठतेपुरस्तात्प्रत्यङ्मुखइतरोपामंजलीपूरयित्वातत्सवितुर्वृणीमहइतिपूर्णेनास्य
पूर्णमवक्षारयत्यासिच्यदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांहस्तंगृह्णाम्यसावितितस्यपाणिनापाणिंसां
गुष्ठंगृह्णीयात्सवितातेहस्तमग्रभीदसावितिद्वितीयमग्निराचार्यस्तवासावितितृतीयमादित्यमीक्षयेद्देवसवितरेषतेब्रह्म
चारीतंगोपायसमामृतेत्याचार्यःकस्यब्रह्मचार्यसिप्राणस्यब्रह्मचार्यसिकस्त्वाकमुपनयतेकायत्वापरिददामीतियुवासु
वासाःपरिवीतऽआगादित्यर्धर्चेनैनंप्रदक्षिणमावर्तयेत्तस्याध्यंसौपाणीकृत्वाहृदयदेशमालभेतोत्तरेणाग्निंपरिसमुह्यब्रह्म
चारीतूष्णींसमिधमादध्यात्तूष्णींवैप्राजापत्यंप्राजापत्योब्रह्मचारीभवतीतिविज्ञायते ॥ २० ॥ मंत्रेणहैकेग्नयेसमिध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माहार्षंबृहतेजातवेदसे ॥ तयात्वमग्नेवर्धस्वसमिधाब्रह्मणावयंस्वाहेतिसंमिधमाधायाग्निमुपस्पृश्यमुखंनिमार्ष्टित्रि
स्तेजसामासमनज्मीतितेजसाह्येवात्मानंसमनक्तीतिविज्ञायते ॥ मयिमेधांमयिप्रजांमय्यग्निस्तेजोदधातु ॥ मयिमे
धांमयिप्रजांमयींद्रइंद्रियंदधातु ॥ मयिमेधांमयिप्रजांमयिसूर्योभ्राजोदधातु ॥ यत्तेअग्नेतेजस्तेनाहंतेजस्वीभूयासं ॥
यत्तेअग्नेवर्चस्तेनाहंवर्चस्वीभूयासं ॥ यत्तेअग्नेहरस्तेनाहंहरस्वीभूयासमित्युपस्थायजान्वाच्योपसंगृह्यब्रूयादधीहिभोः
सावित्रींभो३अनुब्रूहीतितस्यवाससापाणिभ्यांचपाणीसंगृह्यसावित्रीमन्वाहपच्छोर्धर्चशःसर्वीयथाशक्तिंवाचयीतहृद
यदेशेस्योर्ध्वांगुलिंपाणिमुपदधातिममव्रतेहृदयंतेदधामिममचित्तमनुचित्तंतेअस्तु ॥ ममवाचमेकव्रतोजुषस्वबृहस्पति
ष्ट्वानियुनक्तुमह्यमिति ॥ २१ ॥ अथपरिशिष्टं ॥ इयंदुरुक्तात्परिबाधमानाशर्मवरूथंपुनतीनआगात् ॥ प्राणापाना
भ्यांबलमाभरंतीप्रियादेवानांसुभगामेखलेयं ॥ ऋतस्यगोप्त्रीतपसःपस्परींघ्नतीरक्षःसहमानाअरातीः ॥ सानःसमंत
मनुपरेहिभद्रयाभर्तारस्तेमेखलेमारिषाम ॥ मेखलामाबध्यदंडंप्रदायब्रह्मचर्यमादिशेद्ब्रह्मचार्यस्यपोशानकर्मकुरु
दिवामास्वाप्सीराचार्याधीनोवेदमधीष्वेतिद्वादशवर्षाणिवेदब्रह्मचर्यंग्रहणांतंवासायंप्रातर्भिक्षेतसायंप्रातःसमिधमाद
ध्यादप्रत्याख्यायिनमग्रेभिक्षेताप्रत्याख्यायिनींवाभवान्भिक्षांददात्वित्यनुप्रवचनीयमितिवातदाचार्यायवेदयीतंतिष्ठे

१ ससमिधमित्यत्रत्यःसकारोवैदिकपाठेयद्यपिलुप्तप्रायोदृश्यतेतथापिवृत्तिकारादृतोस्ति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दहःशेषमस्तमितेब्रह्मौदनमनुप्रवचनीयंश्रपयित्वाचार्यायवेदयीताचार्यःसमन्वारब्धेजुहुयात्सदसस्पतिमद्भुतमिति
सावित्र्याद्वितीयंयद्यत्किंचातऊर्ध्वमनूक्तंस्यादृषिभ्यस्तृतीयंसौविष्टकृतंचतुर्थंब्राह्मणान्भोजयित्वावेदसमाप्तिंवाचयी
तातऊर्ध्वमक्षारालवणाशीब्रह्मचार्यधःशायीत्रिरात्रंद्वादशरात्रंसंवत्सरंवाचरितव्रतायमेधाजननंकरोत्यनिंदितायांदि
श्येकमूलंपलाशंकुशस्तंबंवापलाशापचारेप्रदक्षिणमुदकुंभेनत्रिःपरिषिंचंतंवाचयति सुश्रवःसुश्रवाअसियथात्वंसुश्रवः
सुश्रवाअस्येवंमांसुश्रवःसौश्रवसंकुरु ॥ यथात्वंदेवानांयज्ञस्यनिधिपोस्येवमहंमनुष्याणांवेदस्यनिधिपोभूयासमित्येते
नवापनादिपरिदानांतंव्रतादेशनंव्याख्यातमित्यनुपेतपूर्वस्याथोपेतपूर्वस्यकृताकृतंकेशवपनंमेधाजननंचानिरुक्तंपरि
दानंकालश्चतत्सवितुर्वृणीमहइतिसावित्रीं ॥ २२ ॥ ऋत्विजोवृणीतेन्यूनानतिरिक्तांगान्येमातृतःपितृतश्चेतियथोक्तं
पुरस्ताद्यूनऋत्विजोवृणीतइत्येकेब्रह्माणमेवप्रथमंवृणीतेथहोतारमथाध्वर्युमथोद्गातारंसर्वान्वायेहीनैकाहैर्याजयंतिसद
स्यंसप्तदशंकौषीतकिनःसमामनंतिसकर्मणामुपद्रष्टाभवंतीतितदुक्तमृग्भ्यांयमृत्विजोबहुधाकल्पयंतइतिहोतारमेवप्र
थमंवृणीतेग्निर्मेहोतासमेहोताहोतारंत्वामुवृणइतिहोतारंचंद्रमामेब्रह्मासमेब्रह्माब्रह्माणंत्वामुवृणइतिब्रह्माणमादित्यो
मेध्वर्युरित्यध्वर्युंपर्जन्योमउद्गातेत्युद्गातारमापोमेहोत्राशंसिन्यइतिहोत्रकान्रश्मयोमेचमसाध्वर्यवइतिचमसाध्वर्यूना
काशोमेसदस्यइतिसदस्यंसवृतोजपेन्महन्मेवोचोभर्गोमेवोचोभगोमेवोचोयशोमेवोचस्तोममेवोचःक्लृप्तिंमेवोचोभुक्तिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेवोचस्तृप्तिमेवोचःसर्वमेवोचइतिजपित्वाग्निष्टेहोतासतेहोताहोताहंतेमानुषइतिहोताप्रतिजानीतेचंद्रमास्तेब्रह्मासते
ब्रह्माब्रह्मैवमितरेयथादेशंतन्मामवतुतन्माविशतुतन्माजिन्वतुतेनभुक्षिषीयेतिचयाजयिष्यन्नयस्तमार्त्विज्यमकार्यमही
नस्यनीचदक्षिणस्यव्याधितस्यातुरस्ययक्ष्मगृहीतस्यानुदेश्यभिशस्तस्यक्षिप्तयोनेरितिचैतेषांसोमःप्रवाकंपरिपृच्छेत्कोय
ज्ञःकऋत्विजःकादक्षिणेतिकल्याणैःसहसंप्रयोगोनमांसमश्नीयुर्नस्त्रियमुपेयुराक्रतोरपवर्गोदेतेनाग्नेब्रह्मणावावृधस्वेति
दक्षिणाग्नावाज्याहुतिंहुत्वायथार्थंप्रव्रजेदेवमनाहिताग्निर्गृह्यइमामग्नेशरणिंमीमृषोनइत्येतयर्चा ॥२३॥ऋत्विजोवृत्वाम
धुपर्कमाहरेत्स्नातकायोपस्थितायराज्ञेचाचार्यश्वशुरपितृव्यमातुलानांचदधनिमध्वानीयसर्पिर्वामध्वलाभेविष्टरःपाद्य
मर्घ्यमाचमनीयंमधुपर्कोगौरित्येतेषांत्रिस्त्रिरेकैकंवेदयंते ॥ अहंवर्ष्मसजातानांविद्युतामिवसूर्यः ॥ इदंतमधितिष्ठामि
योमाकश्चाभिदासतीत्युदगग्रेविष्टरउपविशेदाक्रम्यवापादौप्रक्षालापयीतदक्षिणमग्रेब्राह्मणायप्रयच्छेत्सव्यंशूद्रायप्रक्षा
लितपादोर्घ्यमंजलिनाप्रतिगृह्याथाचमनीयेनाचामत्यमृतोपस्तरणमसीतिमधुपर्कमाह्रियमाणमीक्षतेमित्रस्यत्वाचक्षुषा
प्रतीक्षइतिदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामीतितदंजलिनाप्रतिगृह्यसव्येपाणौकृत्वाम
धुवाताऋतायतइतितृचेनावेक्ष्यानामिकयाचांगुष्ठेनचत्रिःप्रदक्षिणमालोड्यवसवस्त्वागायत्रेणच्छंदसाभक्षयंत्वितिपु
रस्तान्निमार्ष्टिरुद्रास्त्वात्रैष्टुभेनछंदसाभक्षयंत्वितिदक्षिणतआदित्यास्त्वाजागतेनच्छंदसाभक्षयंत्वितिपश्चाद्विश्वेत्वादे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाऽआनुष्टुभेनच्छंदसाभक्षयंत्वित्युत्तरतोभूतेभ्यस्त्वेतिमध्यात्त्रिरुद्गृह्यविराजोदोहोसीतिप्रथमंप्राश्नीयाद्विराजोदोहम
शीयेतिद्वितीयंमयिदोहःपद्यायैविराजइतितृतीयंनसर्वंनतृप्तिंगच्छेद्ब्राह्मणायोदङ्मुच्छिष्टंप्रयच्छेदलाभेप्सुसर्वंवाथाचम
नीयेनान्वाचामंत्यमृतापिधानमसीतिसत्यंयशःश्रीर्मयिश्रीःश्रयतामितिद्वितीयमाचांतोदकायगांवेदयंतेहतोमेपाप्मा
पाप्मामेहतइतिजपित्वोंकुरुतेतिकारयिष्यन्मातारुद्राणांदुहितावसूनामितिजपित्वोमुत्सृजतेत्युत्स्रक्ष्यन्नामांसोमधुप
र्कोभवतिभवति ॥ २४ ॥ ॥ इत्याश्वलायनेगृह्यसूत्रेप्रथमोऽध्यायः ॥ १ ॥ ॥ ॥
हरिः ॐ ३म् ॥ श्रावण्यांपौर्णमास्यांश्रवणाकर्माक्षतसक्तूनांनवंकलशंपूरयित्वादर्वींचबलिहरणींनवेशिक्येनिदधात्यक्ष
तधानाःकृत्वासर्पिषाधाअनक्त्यस्तमितेस्थालीपाकंश्रपयित्वैककपालंचपुरोळाशमग्नेनयसुपथारायेअस्मानितिचतसृ
भिःप्रत्यृचंहुत्वापाणिनैककपालमच्युतायभौमायस्वाहेत्यविप्लुतःस्यादाविःपृष्ठोवामानोअग्नेवसृजोअघायेत्येनमाशयेना
भिजुहोतिशंनोभवंतुवाजिनोहवेष्विवत्यक्ताधानाअंजलिनामात्येभ्यइतरादद्यात्कलशात्सक्तूनांदर्वींपूरयित्वाप्रागुपनि
ष्क्रम्यशुचौदेशेपोवनिनीयसर्पदेवजनेभ्यःस्वाहेतिहुत्वानमस्करोतियेसर्पाःपार्थिवायआंतरिक्ष्यायेदिव्यायेदिश्यास्ते
भ्यइमंबलिमाहार्षंतेभ्यइमंबलिमुपाकरोमीतिप्रदक्षिणंपरीत्यपश्चाद्बलेरुपविश्यसर्पोसिसर्पतांसर्पाणामधिपतिरस्यन्नेन

१ अविप्लुतइतिपाठः प्रचुरप्रचारोप्यबद्धोहेयएव ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनुष्यांस्त्रायसैपूपेनसर्पान्यज्ञेनदेवांस्त्वयिमासंतंत्वयिसंतःसर्पामाहिंसिषुर्ध्रुवांतेपरिददामीतिध्रुवामुंतेध्रुवामुंतइत्यमा
त्याननुपूर्वंध्रुवमांतेपरिददामीत्यात्मानमंततोनैनमंतराव्यवेयुरापरिदानात्सर्पदेवजनेभ्यःस्वाहेतिसायंप्रातर्बलिंहरेदा
प्रत्यवरोहणात्प्रसंख्यायहैकेंतावतोबलींस्तदहरेवोपहरंति ॥ १ ॥ आश्वयुज्यामाश्वयुजीकर्मनिवेशनमलंकृत्यस्नाताः
शुचिवाससःपशुपतयेस्थालीपाकंनिरुप्यजुहुयुःपशुपतयेशिवायशंकरायपृषातकायस्वाहेतिपृषातकमंजलिनाजुहुयादू
नंमेपूर्यतांपूर्णंमेमोपसदत्पृषातकायस्वाहेतिसजूर्ऋतुभिःसजूर्विधाभिःसजूरिंद्राग्निभ्यांस्वाहा ॥ सजूर्ऋतुभिःसजूर्वि
धाभिःसजूर्विश्वेभ्योदेवेभ्यःस्वाहा ॥ सजूर्ऋतुभिःसजूर्विधाभिःसजूर्द्यावापृथिवीभ्यांस्वाहेत्याहिताग्नेराग्रयणस्थाली
पाकोनाहिताग्नेरपिशालाग्नौ ॥ २ ॥ मार्गशीर्ष्यांप्रत्यवरोहणंचतुर्दश्यांपौर्णमास्यांवानिवेशनंपुनर्नवीकृत्यलेपनास्तर
णोपस्तरणैरस्तमितेपायसस्यजुहुयुरपश्वेतपदाजहिपूर्वेणचापरेणच ॥ सप्तचवारुणीरिमाःसर्वाश्चराजबांधवीःस्वाहा ॥
नवैश्वेतश्चाभ्यागारेहिर्जघानकिंचन ॥ श्वेतायवैदार्वायनमःस्वाहेतिनात्रसौविष्टकृदभयंनःप्राजापत्येभ्योभूयादित्य
ग्निमीक्षमाणोजपतिशिवोनःसुमनाभवेतिहेमंतंमनसाध्यायात्पश्चादग्नेःस्वस्तरःस्वास्तीर्णस्तस्मिन्नुपविश्यस्योनापृथिवि
भवेतिजपित्वासंविशेत्सामात्यःप्राक्शिराउदङ्मुखोयथावकाशमितरेज्यायान्ज्यायान्वानंतरोमंत्रविदोमंत्रान्जपेयुः
संहायातोदेवाअवंतुनइतितिस्रिरेतांदक्षिणामुखाःप्रत्यङ्मुखाउदङ्मुखाश्चतुर्थंसंहायसौर्याणिस्वस्त्ययनानिचजपित्वान्नंसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्कृत्यब्राह्मणान्भोजयित्वास्वस्त्ययनंवाचयीत ॥ ३ ॥ हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाऽएक
स्यांवापूर्वेद्युःपितृभ्योदद्यादोदनंकृसरंपायसंचतुःशरावस्यवापूपानुदीरतामवरउत्परासइत्यष्टाभिर्हुत्वायावतीभिर्वा
कामयीताथश्वोभूतेष्टकाःपशुनास्थालीपाकेनचाप्यनडुहोयवसमाहरेदग्निनावाकक्षमुपोषेदेषामेष्टकेतिनत्वेवानष्टकः
स्यात्तांहैकेवैश्वदेवींब्रुवतआग्नेयीमेकेसौर्यामेकेप्राजापत्यामेकेरात्रिदेवतामेकेनक्षत्रदेवतामेकेऋतुदेवतामेकेपितृदेवता
मेकेपशुदेवतामेकेपशुकल्पेनपशुंसंज्ञप्यप्रोक्षणोपाकरणवर्जंवपामुत्खिद्यजुहुयाद्धवपांजातवेदःपितृभ्योयत्रैनान्वेत्थ
निहितान्पराकेमेदसःकुल्याउपैनान्स्रवंतुसत्याऽएताआशिषःसंतुसर्वाःस्वाहेत्यथावदानानांस्थालीपाकस्यचाग्नेनयसुप
थारायेअस्मानितिद्वेग्रीष्मोहेमंतऽऋतवःशिवानोवर्षाःशिवाअभयाःशरन्नः ॥ संवत्सरोधिपतिःप्राणदोनोहोरात्रेकृणु
तांदीर्घमायुःस्वाहा ॥ शांतापृथिवीशिवमंतरिक्षंद्यौर्नोदेव्यभयंनोअस्तु ॥ शिवादिशःप्रदिशउद्दिशोनआपोविद्युतःप
रिपांतुसर्वतःस्वाहा ॥ आपोमरीचीःप्रवहंतुनोधियोधातासमुद्रोवहंतुपापं॥ भूतंभविष्यदभयंविश्वमस्तुमेब्रह्माधिगुप्तः
स्वाराक्षराणिस्वाहा ॥ विश्वआदित्यावसवश्चदेवारुद्रागोप्तारोमरुतःसदंतु ॥ ऊर्जंप्रजाममृतंपिन्वमानःप्रजापतिर्मयिप
रमेष्ठीदधातुस्वाहा ॥ प्रजापतेनत्वदेतान्यन्यःसौविष्टकृत्यष्टमींब्राह्मणान्भोजयेदित्युक्तं ॥४॥ अपरेद्युरन्वष्टक्यंतस्यै
वमांसस्यप्रकल्प्यदक्षिणाप्रवणेग्निमुपसमाधायपरिश्रित्योत्तरतःपरिश्रितस्यद्वारंकृत्वासमूलंबर्हिस्त्रिरपसलैरविधून्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्परिस्तीर्यहवींष्यासादयेदोदनंकृसरंपायसंदधिमंथान्मधुमंथाश्चपिंडपितृयज्ञकल्पेनहुत्वामधुमंथवर्जंपितृभ्योदद्यात्स्त्रीभ्यश्चसुराचाचाममित्यधिकंकर्षूष्वेकेद्वयोःषट्सुवापूर्वासुपितृभ्योदद्यादपरासुस्त्रीभ्यएतेनमाघ्यावर्षीप्रोष्ठपद्याअपरपक्षेमासिमासिचैवंपितृभ्योयुक्षुप्रतिष्ठापयेन्नवावरान्भोजयेदयुजोवायुग्मान्वृद्धिपूर्तेष्वयुग्मानितरेषुप्रदक्षिणमुपचारोयवैस्तिलार्थैः ॥ ५ ॥ रथमारोक्ष्यन्नानापाणिभ्यांचक्रेअभिमृशेदहंतेपूर्वपादावारभेबृहद्रथंतरेतेचक्रेवामदेव्यमक्ष इत्यक्षाधिष्ठानेदक्षिणपूर्वाभ्यामारोहेद्वायोष्ट्वावीर्येणारोहामींद्रस्यौजसाधिपत्येनेतिरश्मीन्त्संमृशेदरश्मिकान्वादंडेनब्रह्मणोवस्तेजसासंगृह्णामिसत्येनवःसंगृह्णामीत्यभिप्रवर्तमानेषुजपेत्सहस्रसनिंवाजमभिवर्तस्वरथदेवप्रवहवनस्पतेवीड्वंगोहिभूयाइत्येतयान्यान्यपिवानस्पत्यानिस्थिरौगावौभवतांवीळुरक्षऽइतिरथांगमभिमृशेत्सुत्रामाणंपृथिवींद्यामनेहसमितिनावंनवरथेनयशस्विनंवृक्षंहृदंवाविदासिनंप्रदक्षिणंकृत्वाफलवतीःशाखाआहरेदन्यद्वाकौटुंबंसंसदमुपयायादस्माकमुत्तमंकृधीत्यादित्यमीक्षमाणोजपित्वावरोहेद्वृषभंमासमानानामित्यभिक्रामन्वयमद्येंद्रस्यप्रेष्ठाइत्यस्तंयात्यादित्येतद्वोदिवोदुहितरोविभातीरितिव्युष्टायां ॥ ६ ॥ अथातोवास्तुपरीक्षानूखरमविवदिष्णुंभूमौषधिवनस्पतिवद्यस्मिन्कुशवीरिणंप्रभूतंकंटकिक्षीरिणस्तुसमूलान्परिखायोद्वासयेदपामार्गःशाकःस्तिल्वकःपरिव्याधइतिचैतानियत्रसर्वतआपोमध्यंसमेत्यप्रदक्षिणंशयनीयंपरीत्यप्राच्यःस्यंदेरन्नप्रवदत्यस्तत्सर्वंसमृद्धंसमवस्रवेभक्तशरणंकारयेद्ब्रह्मन्नंहभव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिदक्षिणाप्रवणेसभांमापयेत्साद्यूताहभवतियुवानस्तस्याकितवाःकलहिनःप्रमायुकाभवंतियत्रसर्वतआपःप्रस्यंदेर
न्त्सास्वस्त्ययन्यद्यूताच ॥ ७ ॥ अथैतैर्वास्तुपरीक्षेतजानुमात्रंगर्तंखात्वातैरेवपांसुभिःप्रतिपूरयेदधिकेप्रशस्तंसमेवा
र्तंन्यूनेगर्हितमस्तमितेपांपूर्णंपरिवासयेत्सोदकेप्रशस्तमार्द्रेवार्तेशुष्केगर्हितंश्वेतंमधुरास्वादंसिकतोत्तरंब्राह्मणस्यलोहितं
क्षत्रियस्यपीतंवैश्यस्यतत्सहस्रसीतंकृत्वायथादिक्समचतुरस्रंमापयेदायतचतुरस्रंवातच्छमीशाखयोदुंबरशाखयावाशं
तातीयेनत्रिःप्रदक्षिणंपरिव्रजन्प्रोक्षत्यविच्छिन्नयाचोदकधारयापोहिष्ठामयोभुवइतितृचेनवंशांतरेषुशरणानिकारयेद्ग
र्तेष्ववकांशीपालमित्यवधापयेन्नास्यदाहुकोभवतीतिविज्ञायतेमध्यमस्थूणायागर्तेवधायप्रागग्रोदगग्रान्कुशानास्तीर्य
व्रीहियवमतीरपआसेचयेदच्युतायभौमायस्वाहेत्यथैनामुच्छ्रीयमाणामनुमंत्रयेतेहैवतिष्ठनिमितातिल्विलास्तामिराव
तींमध्येपोषस्यतिष्ठंतीं॥आत्वाप्रापन्नघायवंआत्वाकुमारस्तरुणंआवत्सोजायतांसह॥ आत्वापरिश्रितःकुंभआदध्नःकल
शैरयन्निति ॥८॥ वंशमाधीयमानंमृतेनस्थूणामधिरोहवंशंद्राघीयआयुःप्रतरंदधानाऽइतिसदूर्वासुचतसृषुशिलासुम
णिकंप्रतिष्ठापयेत्पृथिव्याअधिसंभवेत्यरंगरोवावदीतित्रेधाबद्धोवरत्रया ॥ इरामुहप्रशंसत्यनिरामपबाधतामितिवा
थास्मिन्नपआसेचयेदैतुराजावरुणोरेवतीभिरास्मिंस्थानेतिष्ठतुमोदमानः॥ इरांवहंतोघृतमुक्षमाणामित्रेणसाकंसहसंवि
शंत्वित्यथैनच्छमयतिव्रीहियवमतीभिरद्भिर्हिरण्यमवधायशंतातीयेनत्रिःप्रदक्षिणंपरिव्रजन्प्रोक्षत्यविच्छिन्नयाचोदक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धारयापोहिष्ठामयोभुवइतितृचेनमध्येगारस्यस्थालीपाकंश्रपयित्वावास्तोष्पतेप्रतिजानीह्यस्मानितिचतसृभिःप्रत्यृचंहु
त्वान्नंसंस्कृत्यब्राह्मणान्भोजयित्वाशिवंवास्तुशिवंवास्त्विवतिवाचयीत ॥ ९ ॥ उक्तंगृहप्रपदनंबीजवतोगृहान्प्रपद्येतक्षे
त्रंप्रकर्षयेदुत्तरैःप्रोष्ठपदैःफल्गुनीभीरोहिण्यावाक्षेत्रस्यानुवातंक्षेत्रस्यपतिनावयमितिप्रत्यृचंजुहुयाज्जपेद्वागाःप्रतिष्ठमा
नाअनुमंत्रयेतमयोभूर्वातोऽअभिवातूस्राइतिद्वाभ्यामायतीर्यासामूधश्चतुर्बिलंमधोःपूर्णंघृतस्यच ॥ तानःसंतुपयस्व
तीर्बह्वीर्गोष्ठेघृताच्यः ॥ उपमैतुमयोभुवऊर्जंचौजश्चबिभ्रतीः ॥ दुहानाअक्षितंपयोमयिगोष्ठेनिविशध्वंयथाभवाम्यु
त्तमोयादेवेषुतन्वमैरयंतेतिचसूक्तशेषमागावीयमेकेगणानासामुपतिष्ठेतागुरुगवीनांभूतास्थप्रशस्तास्थशोभनाःप्रियाः
प्रियोवोभूयासंशंमयिजानीध्वंशंमयिजानीध्वं ॥ १० ॥ ॥ इतिगृह्यसूत्रेद्वितीयोऽध्यायः ॥ २ ॥ ॥

हरिः ॥ ॐ ३म् ॥ अथातःपंचयज्ञादेवयज्ञोभूतयज्ञःपितृयज्ञोब्रह्मयज्ञोमनुष्ययज्ञइतितद्यदग्नौजुहोतिसदेवयज्ञो
यद्बलिंकरोतिसभूतयज्ञोयत्पितृभ्योददातिसपितृयज्ञोयत्स्वाध्यायमधीतेसब्रह्मयज्ञोयन्मनुष्येभ्योददातिसमनुष्ययज्ञ
इतितानेतान्यज्ञानहरहःकुर्वीत ॥ १ ॥ अथस्वाध्यायविधिःप्राग्वोदग्वाग्रामान्निष्क्रम्यापआप्लुत्यशुचौदेशेयज्ञोप
वीत्याचम्याक्लिन्नवासादर्भाणांमहदुपस्तीर्यप्राक्कूलानांतेषुप्राङ्मुखउपविश्योपस्थंकृत्वादक्षिणोत्तरौपाणीसंधायपवित्रवं
तौविज्ञायतेपांवाएषऽओषधीनांरसोयद्दर्भाःसरसमेवतद्ब्रह्मकरोतिद्यावापृथिव्योःसंधिमीक्षमाणःसंमील्यवायथावा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युक्तमात्मानंमन्येतंतथायुक्तोधीयीतस्वाध्यायंमोंपूर्वाव्याहृतयंःसावित्रीमन्वाहपच्छोर्धर्चशंःसर्वामितितृतीयं॥२॥अथ
स्वाध्यायमधीयीतंऋचोयजूंषिसामान्यंथर्वांगिरसोब्राह्मणानिकल्पांन्गाथानाराशंसींरितिहासपुराणानीतियद्दचोधी
तेपयआहुतिभिरेवंतद्देवतास्तर्पयतियद्यजूंषिघृताहुतिभिर्यसामानिमध्वाहुतिभिर्यदथर्वांगिरसःसोमाहुतिभिर्यद्ब्राह्म
णानिकल्पांन्गाथानाराशंसींरितिहासपुराणानींत्यमृताहुतिभिर्यद्दचोधीतेपयसःकुल्यांअस्यपितृन्त्स्वधाउपक्षरंतियद्य
जूंषिघृतस्यकुल्यांयत्सामानिमध्वःकुल्यांयदथर्वांगिरसःसोमस्यकुल्यांयद्ब्राह्मणानिकल्पांन्गाथानाराशंसींरितिहासपु
राणानींत्यमृतस्यकुल्यांःसयावन्मन्येतंतावदधीत्येतयापरिदधातिंनमोब्रह्मणेनमोअस्त्वग्नयेंनमःपृथिव्यैनमओषधी
भ्यः ॥ नमोवाचेनमोवाचस्पतयेंनमोविष्णवेमहतेकरोमीति॥३॥देवतास्तर्पयतिंप्रजापतिर्ब्रह्मावेदादेवांऋषयःसर्वाणि
च्छंदांस्योंकारोवषट्कारोंव्याहृतयःसावित्रीयज्ञांद्यावापृथिवीऽअंतरिक्षमहोरात्राणिंसांख्याःसिद्धाःसमुद्रानद्योगिरयंः
क्षेत्रौषधिवनस्पतिगंधर्वाप्सरसोंनागावयांसिगावःसाध्यांविप्रायक्षारक्षांसिंभूतान्येवमंतांन्यथऽऋषयंःशतर्चिनोम
ध्यमांगृत्समदोविश्वामित्रोंवामदेवोत्रिर्भरद्वाजोंवसिष्ठःप्रगाथाःपावमान्यंःक्षुद्रसूक्तामहासूक्ताइतिप्राचीनावीतींसुमं
तुजैमिनिवैशंपायनंपैलसूत्रभाष्यभारतंमहाभारतधर्माचार्यांजानंतिबाहविगार्ग्यगौतमंशाकल्यबाभ्रव्यमांडव्यमांडू
केयांगर्गींवाचक्नवींवडवाप्रातीथेयींसुलभामैत्रेयींकहोळंकौषीतकंमहाकौषीतकंपैंग्यंमहापैंग्यंसुयज्ञंसांख्यायनंमैतरेयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महैतरेयैशाकलंबाष्कलंसुजातवक्रमौदवाहिंमहौदवाहिंसौजामिंशौनकंमाश्वलायनंयेचान्येऽआचार्यास्तेसर्वेतृप्यन्त्विति प्रतिपुरुषंपितॄंस्तर्पयित्वागृहानेत्ययद्ददातिसादक्षिणाथापिविज्ञायतेसयदितिष्ठन्व्रजन्नासीनःशयानोवायंयंक्रतुमधीतेतेनतेनहास्यक्रतुनेष्टंभवतीतिविज्ञायतेतस्यद्वावनध्यायौयदात्माशुचिर्यद्देशः ॥४॥ अथातोध्यायोपाकरणमोषधीनां प्रादुर्भावेश्रवणेनश्रावणस्यपंचम्यांहस्तेनवाज्यभागौहुत्वाज्याहुतीर्जुहुयात्सावित्र्यैब्रह्मणेश्रद्धायैमेधायैप्रज्ञायैधारणायैसदसस्पतयेनुमतयेछंदोभ्यऽऋषिभ्यश्चेत्यथदधिसक्तूजुहोत्यग्निमीळेपुरोहितमित्येकाकुषुंभकस्तदब्रवीदावदंस्त्वंशकुनेभद्रमावदगृणानाजमदग्निनाधामंतेविश्वंभुवनमधिश्रितंगंतानोयज्ञंयज्ञियाःसुशमियोनस्वोऽअरणःप्रतिचक्ष्वविचक्ष्वाग्नेयाहिमरुत्सखायत्तेराजन्छृतंहविरितिद्वृचाःसमानीवऽआकूतिरित्येकातच्छंयोरावृणीमहइत्येकाध्येष्यमाणोध्याप्यैरन्वारब्धएताभ्योदेवताभ्योहुत्वासौविष्टकृतंहुत्वादधिसक्तून्प्राश्यततोमार्जनमपरेणाग्निंप्राक्कूलेषुदर्भेषूपविश्योदपात्रेदर्भान्कृत्वाब्रह्मांजलिकृतोजपेदोंपूर्वाव्याहृतयःसावित्रींचत्रिरभ्यस्यवेदादिमारभेतथोत्सर्गेषण्मासानधीयीतसमावृत्तोब्रह्मचारिकल्पेनयथान्यायमितरेजायोपेयेत्येकेप्राजापत्यंतद्वार्षिकमित्येतदाचक्षतेमध्यमाष्टकायामेताभ्योदेवताभ्योन्नेनहुत्वापोभ्यवयेत्येताएवतद्देवतास्तर्पयेत्याचार्यानृषीन्पितॄंश्चैतदुत्सर्जनं॥५॥अथकाम्यानांस्थानेकाम्याश्चरवस्तानेवकामानाप्नोत्यथव्याधितस्यातुरस्ययक्ष्मगृहीतस्यवाषळाहुतिश्चरुर्मुंचामित्वाहविषाजीवनायकमित्येतेनस्वप्नम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनोज्ञंदृष्ट्वाद्यानोदेवसवितरितिद्वाभ्यांयच्चगोषुदुःस्वप्न्यमितिपंचभिरादित्यमुपतिष्ठेतयोमेराजन्युज्योवासखावेतिवा
क्षुत्वाजृंभित्वामनोज्ञंदृष्ट्वापापकंगंधमाघ्रायाक्षिस्पंदनेकर्णध्वननेचसुचक्षाअहमक्षीभ्यांभूयासंसुवर्चामुखेनसुश्रुत्कर्णा
भ्यांमयिदक्षक्रतूइतिजपेदगमनीयांगत्वायाज्यंयाजयित्वाभोज्यंभुक्त्वाप्रतिग्राह्यंप्रतिगृह्यचैत्यंयूपंवोपहत्यपुनर्मामे
त्विंद्रियंपुनरायुःपुनर्भगः॥पुनर्द्रविणमैतुमांपुनर्ब्राह्मणमैतुमांस्वाहा॥इमेयेधिष्ण्यासोअग्नयोयथास्थानमिहकल्पतां ॥
वैश्वानरोवावृधानोन्तर्यच्छतुमेमनोहृद्यंतरममृतस्यकेतुःस्वाहेत्याज्याहुतीर्जुहुयात्समिधौवाजपेद्वा ॥ ६ ॥ अव्याधितं
चेत्स्वपंतमादित्योभ्यस्तमियाद्वाग्यतोनुपविशंत्रात्रिशेषंभूत्वायेनसूर्यज्योतिषाबाधसेतमइतिपंचभिरादित्यमुपतिष्ठेता
भ्युदियाच्चेदकर्मश्रांतमनभिरूपेणकर्मणावाग्यतइतिसमानमुत्तराभिश्चतसृभिरुपस्थानंयज्ञोपवीतीनित्योदकःसंध्यामु
पासीतवाग्यतःसायमुत्तरापराभिमुखोन्वष्टमदेशंसावित्रींजपेदर्धास्तमितेमंडलआनक्षत्रदर्शनादेवंप्रातःप्राङ्मुखस्तिष्ठ
न्नामंडलदर्शनात्कपोतश्चेदगारमुपहन्यादनुपतेद्वादेवाःकपोतइतिप्रत्यृचंजुहुयाज्जपेद्वावयमुत्वापथस्पतइत्यर्थचर्यांच
रिष्यन्संपूषन्विदुषइतिनष्टमधिजिगमिषन्मूढोवासंपूषन्नध्वनइतिमहांतमध्वानमेष्यन्प्रतिभयंवा ॥ ७ ॥ अथैतान्युप
कल्पयीतसमावर्तमानोमणिंकुंडलेवस्त्रयुगंछत्रमुपानद्युगंदंडंस्रजमुन्मर्दनमनुलेपनमांजनमुष्णीषमित्यात्मनेचाचार्या
यचयद्युभयोर्नविंदेताचार्यायैवसमिधंत्वाहरेदपराजितायांदिशियज्ञियस्यवृक्षस्यार्द्रामन्नाद्यकामःपुष्टिकामस्तेजस्कामो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाब्रह्मवर्चसकामउपवातामुभयीमुभयकामउपरिसमिधंकृत्वागामन्नंचब्राह्मणेभ्यःप्रदायगौदानिकंकर्मकुर्वीतात्मनि
मंत्रान्त्सन्नमयेदेकक्लीतकेनशीतोष्णाभिरद्भिःस्नात्वायुवंवस्त्राणिपीवसावसाथेइत्यहतेनवाससीआच्छाद्याश्मनस्तेजो
सिचक्षुर्मेपाहीतिचक्षुषीआंजयीताश्मनस्तेजोसिश्रोत्रंमेपाहीतिकुंडलेआबध्नीतानुलेपनेनपाणीप्रलिप्यमुखमग्रेब्राह्मणो
नुलिंपेद्बाहूराजन्यउदरंवैश्यउपस्थंस्रुयूरूसरणजीविनौनार्तास्यनार्तोहंभूयासमितिस्रजमपिबध्नीतनमालोक्तांमालेतिचे
द्ब्रूयुःस्रगित्यभिधापयीतदेवानांप्रतिष्ठेस्थःसर्वतोमापातमित्युपानहावास्थायदिवश्छद्मासीतिछत्रमादत्तेवेणुरसिवान
स्पत्योसिसर्वतोमापाहीतिवैणवंदंडमायुष्यमितिसूक्तेनमणिंकंठेप्रतिमुच्योष्णीषंकृत्वातिष्ठन्त्समिधमादध्यात् ॥ ८ ॥
स्मृतंनिंदाचविद्याचश्रद्धाप्रज्ञाचपंचमी ॥ इष्टंदत्तमधीतंचकृतंसत्यंश्रुतंव्रतं ॥ यदग्नेसेंद्रस्यसप्रजापतिकस्यसऋषिक
स्यसऋषिराजन्यस्यसपितृकस्यसपितृराजन्यस्यसमनुष्यस्यसमनुष्यराजन्यस्यसाकाशस्यसातीकाशस्यसानूकाशस्यस
प्रतीकाशस्यसदेवमनुष्यस्यसगंधर्वाप्सरस्कस्यसहारण्यैश्चपशुभिर्ग्राम्यैश्चयन्मआत्मनआत्मनिव्रतंतन्मेसर्वव्रतमिदम
हमग्नेसर्वव्रतोभवामिस्वाहेतिममाग्नेवर्चइतिप्रत्यृचंसमिधोभ्यादध्याद्यत्रैनंपूजयिष्यंतोभवंतितत्रैतांरात्रींवसेद्विद्यांत
गुरुमर्थेननिमंत्र्यकृतानुज्ञातस्यवास्नानंतस्यैतानिव्रतानिभवंतिननक्तंस्नायान्ननग्नःस्नायान्ननग्नःशयीतननग्नांस्त्रियमी
क्षेतान्यत्रमैथुनाद्धर्षतिनधावेन्नवृक्षमारोहेन्नकूपमवरोहेन्नबाहुभ्यांनदींतरेन्नसंशयमभ्यापद्येतमहद्वैभूतंस्नातकोभवती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिविज्ञायते ॥ ९ ॥ गुरवेप्रस्रक्ष्यमाणोनामप्रब्रुवीतेदंवत्स्यामोभो३इत्युच्चैरूर्ध्वनाम्नःप्राणापानयोरुपांश्वामंद्रैरिंद्रहरि
भिरितिचातोवृद्धोजपतिप्राणापानयोरुरुव्यचास्तयाप्रपद्येदेवायसवित्रेपरिददामीत्यृचंचसमाप्योप्राक्स्वस्तीतिजपि
त्वामहित्रीणामित्यनुमंत्र्यैवमतिसृष्टस्यनकुतश्चिद्भयंभवतीतिविज्ञायतेवयसाममनोज्ञावाचःश्रुत्वाकनिक्रदज्जनुषंप्रब्रु
वाणइतिसूक्तेजपेद्देवींवाचमजनयंतदेवाइतिचस्तुहिश्रुतंगर्तसदंयुवानमितिमृगस्ययस्यादिशोबिभीयाद्यस्माद्वातांदि
शमुल्मुकमुभयतःप्रदीप्तंप्रत्यस्येन्मंथंवाप्रसव्यमालोड्याभयंमित्रावरुणामह्यमस्त्वर्चिषाशत्रून्दहंतंप्रतीत्यमाज्ञातारं
माप्रतिष्ठांविंदंतुमिथोभिंदानाउभयंतुमृत्युमितिसंसृष्टंधनमुभयंसमाकृतमितिमंथंन्यंचंकरोति ॥ १० ॥ सर्वतोभया
दनाज्ञातादष्टावाज्याहुतीर्जुहुयात्पृथिवीवृतासाग्निनावृतातयावृतयावर्त्र्यायस्माद्भयाद्बिभेमितद्वारयेस्वाहा ॥ अंत
रिक्षंवृतंतद्वायुनावृतंतेनवृतेनवर्त्रेणयस्माद्भयाद्बिभेमितद्वारयेस्वाहा ॥ द्यौर्वृतासादित्येनवृतातयावृतयावर्त्र्यायस्मा
द्भयाद्बिभेमितद्वारयेस्वाहा ॥ दिशोवृतास्ताश्चंद्रमसावृतास्ताभिर्वृताभिर्वर्त्रीभिर्यस्माद्भयाद्बिभेमितद्वारयेस्वाहा ॥
आपोवृतास्तावरुणेनवृतास्ताभिर्वृताभिर्वर्त्रीभिर्यस्माद्भयाद्बिभेमितद्वारयेस्वाहा ॥ प्रजावृतास्ताःप्राणेनवृतास्ताभि
र्वृताभिर्वर्त्रीभिर्यस्माद्भयाद्बिभेमितद्वारयेस्वाहा ॥ वेदावृतास्तेछंदोभिर्वृतास्तैर्वृतैर्वर्त्रैर्यस्माद्भयाद्बिभेमितद्वारयेस्वा
हा ॥ सर्ववृतंतद्ब्रह्मणावृतंतेनवृतेनवर्त्रेणयस्माद्भयाद्बिभेमितद्वारयेस्वाहेत्यथापराजितायांदिश्यवस्थायस्वस्त्यात्रेयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जपतियतइंद्रभयामहइतिचसूक्तशेषं ॥ ११ ॥ संग्रामेसमुपोह्वेराजानंसंनाहयेदात्वाहार्षमंतरेधीतिपश्चाद्रथस्यावस्थाय
जीमूतस्येवभवतिप्रतीकमितिकवचंप्रयच्छेदुत्तरयाधनुरुत्तरांवाचयेत्स्वयंचतुर्थींजपेत्पंचम्येषुधिंप्रयच्छेदभिप्रवर्तमा
नेषष्ठींसप्तम्याश्वानष्टमींमिषूनवेक्षमाणंवाचयत्यहिरिवभोगैःपर्येतिबाहुमितितलंनह्यमानमथैनंसारयमाणमुपारुह्या
भीवर्तवाचयतिप्रयोवांमित्रावरुणेतिचद्वेअथैनवोमन्वीक्षेतांप्रतिरश्वशाससौपर्णैःप्रधारयंतुमधुनोघृतस्येत्येतत्सौपर्णंस
र्वादिशोनुपर्यायादादित्यमौशनसंवावस्थायप्रबोधयेदुपश्वासयपृथिवीमुतद्यामितितृचेनदुंदुभिमभिमृशेदवसृष्टापरा
पतेतीषून्विसर्जयेद्यत्रबाणाःसंपतंतीतिचयुध्यमानेषुजपेत्संशिष्याद्वासंशिष्याद्वा ॥ १२ ॥ ॥ इतिगृ. तृ. ॥ ३ ॥

अथचतुर्थःपादः ॥ हरिःॐ३म् ॥ ॥ आहिताग्निश्चेदुपतपेत्प्राच्यामुदीच्यामपराजितायांवादिश्युदवस्येद्ग्रा
मकामाअग्नयइत्युदाहरेत्याशंसंतएनंग्राममाजिगमिषंतोऽगदंकुर्युरितिहविज्ञायतेऽगदःसोमेनपशुनेष्ट्वेष्ट्वावस्येदनिष्ट्वा
वासंस्थितेभूमिभागंखानयेद्दक्षिणपूर्वस्यांदिशिदक्षिणापरस्यांवादक्षिणाप्रवणंप्राग्दक्षिणाप्रवणंवाप्रत्यग्दक्षिणाप्रवण
मित्येकेयावानूर्ध्वबाहुकःपुरुषस्तावदायामैव्याममात्रंतिर्यग्वितस्त्यवांगभितआकाशंश्मशानंबहुलौषधिकैकंटकिक्षी
रिणस्त्विवतियथोक्तंपुरस्ताद्यत्रसर्वतआपःप्रस्यंदेरन्नेतदादहनस्यलक्षणंश्मशानस्यकेशश्मश्रुलोमनखानीत्युक्तंपुरस्ता
द्विगुल्फंबर्हिराज्यंचदधन्यत्रसर्पिरानयेत्येतत्पित्र्यंपृषदाज्यम् ॥ १ ॥ अथैतांदिशमग्नीन्नयंतियज्ञपात्राणिचा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्वंचंप्रेतमयुजोमिथुनाप्रवयसःपीठचक्रेणगोयुक्तेनेत्येकेनुस्तरणींगामजांवैकवर्णांकृष्णामेकेसव्यबाहूबध्वानुसंकालयँ
त्यन्वंचोमात्याअधोनिवीताःप्रवृत्तशिखाज्येष्ठप्रथमाःकनिष्ठजघन्याःप्राप्यैवंभूमिभागंगतोदकेनशमीशाखयात्रिःप्रस
व्यमायतनंपरिव्रजन्प्रोक्षत्यपेतवीतविचसर्पतातइतिदक्षिणपूर्वउद्धृतांतआहवनीयंनिदधात्युत्तरपश्चिमेगार्हपत्यंदक्षि
णपश्चिमेदक्षिणमथैनमंतर्वेदीध्मचित्तिंचिनोतियोजानातितस्मिन्बर्हिरास्तीर्यकृष्णाजिनंचोत्तरलोमतस्मिन्प्रेतंसंवेश
यंत्युत्तरेणगार्हपत्यंहृत्वाहवनीयमभिशिरसमुत्तरतःपत्नीधनुश्चक्षत्रियायतामुत्थापयेद्देवरःपतिस्थानोयोंतेवासीजरद्दा
सोवोदीर्ष्वनार्यभिजीवलोकमितिकर्तावृषलेजपेद्धनुर्हस्तादाददानोमृतस्येतिधनुरुक्तंवृषलेऽधिज्यंकृत्वासंचितिमचि
त्वासंशीर्यानुप्रहरेत् ॥ २ ॥ अथैतानिपात्राणियोजयेद्दक्षिणेहस्तेजुहूंसव्यऽउपभृतंदक्षिणेपार्श्वेस्फ्यंसव्येऽग्नि
होत्रहवणीमुरसिध्रुवांशिरसिकपालानिदत्सुग्राव्णोनासिकयोःस्रुवौभित्त्वाचैकंकर्णयोःप्राशित्रहरणेभित्त्वाचैकमुदरे
पात्रींसमवत्तधानंचचमसमुपस्थेशम्यामरणीऊवोरुलूखलमुसलेजंघयोःपादयोःशूर्पेछित्त्वाचैकमासेचनवंतिपृषदाज्यं
पूरयंत्यमापुत्रोदृषदुपलेकुर्वीतलौहायसंचकौलालमनुस्तरण्यावपामुत्खिद्यशिरोमुखंप्रच्छादयेदग्नेर्वर्मपरिगोभिर्व्य
यस्वेतिवृक्काउद्धृत्यपाण्योरादध्यादतिद्रवसारमेयौश्वानाविति दक्षिणेदक्षिणंसव्येसव्यंहृदयेहृदयंपिंड्यौचैकेवृक्कापचा
रइत्येकेसर्वायथांगंविनिक्षिप्यचर्मणाप्रच्छाद्येममग्नेचमसंमाविजिह्वरइतिप्रणीताप्रणयनमनुमंत्रयतेसव्यंजान्वाच्यद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षिणाग्नावाज्याहुतीर्जुहुयादग्नयेस्वाहाकामायस्वाहालोकायस्वाहानुमतयेस्वाहेतिपंचमीमुरसिप्रेतस्यास्माद्वैत्वमजाय
थाअयंत्वदधिजायतामसौस्वर्गायलोकायस्वाहेति ॥ ३ ॥ प्रेष्यतियुगपदग्नीन्प्रज्वालयतेत्याहवनीयश्चेत्पूर्वंप्राप्नुया
त्स्वर्गलोकएनंप्रापदितिविद्याद्रात्स्यत्यसावमुत्रैवमयमस्मिन्नितिपुत्रोगार्हपत्यश्चेत्पूर्वंप्राप्नुयादंतरिक्षलोकएनंप्रापदिति
विद्याद्रात्स्यत्यसावमुत्रैवमयमस्मिन्नितिपुत्रोदक्षिणाग्निश्चेत्पूर्वंप्राप्नुयान्मनुष्यलोकएनंप्रापदितिविद्याद्रात्स्यत्यसावमु
त्रैवमयमस्मिन्नितिपुत्रोयुगपत्प्राप्तौपरामृद्धिंवदंतितंदह्यमानमनुमंत्रयतेप्रेहिप्रेहिपथिभिःपूर्व्येभिरितिसमानंसएवं
विदादह्यमानःसहैवधूमेनस्वर्गलोकमेतीतिविज्ञायतउत्तरपुरस्तादाहवनीयस्यजानुमात्रंगर्तंखात्वावकांशीपालमित्यव
धापयेत्ततोहवाएषनिष्क्रम्यसहैवधूमेनस्वर्गलोकमेतीतिविज्ञायतइमेजीवाविमृतैराववृत्रन्नितिसव्यावृतोव्रजेत्यनवेक्ष
माणायत्रोदकमवहद्भवतितत्प्राप्यसकृदुन्मृज्यैकांजलिमुत्सृज्यतस्यगोत्रंनामचगृहीत्वोत्तीर्यान्यानिवासांसिपरिधाय
सकृदेनान्पीड्योदग्दशानिविसृज्यासतआनक्षत्रदर्शनादादित्यस्यवादर्शनेप्रविशेयुःकनिष्ठप्रथमाज्येष्ठजघन्याःप्राप्या
गारमश्मानमग्निंगोमयमक्षतांस्तैलमपउपस्पृशंतिनैतस्यांरात्र्यामन्नंपचेरन्क्रीतोत्पन्नेनवावर्तेरन्त्रिरात्रमक्षारालवणा
शिनःस्युर्द्वादशरात्रंवामहागुरुषुदानाध्ययनेवर्जयेरन्दशाहंसपिंडेषुगुरौचासपिंडेप्रत्तासुचस्त्रीषुरात्रमितरेष्वाचार्येषु
ज्ञातौचासपिंडेप्रत्तासुचस्त्रीष्वदंतजातेपरिजातेचैकाहंसब्रह्मचारिणिसमानग्रामीयेचश्रोत्रिये ॥ ४ ॥ संचयनमूर्ध्वंद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शम्याःकृष्णपक्षस्यायुजास्वेकनक्षत्रेलक्षणेकुंभेपुमांसमलक्षणायांस्त्रियमयुजोमिथुनाःप्रवयसःक्षीरोदकेनशमीशाखया
त्रिःप्रसव्यमायतनंपरिव्रजन्प्रोक्षतिशीतिकेशीतिकावतीत्यंगुष्ठोपकनिष्ठिकाभ्यामेकैकमस्थ्यसंह्रादयंतोवदध्युःपादौपू
र्वंशिरउत्तरंसुसंचितंसंचित्यपवनेनसंपूर्ययत्रसर्वतआपोनाभिस्पंदेरन्नन्यावर्षाभ्यस्तत्रगर्तेवदध्युरुपसर्पमातरंभूमिमे
तामित्युत्तरयापांसूनवकिरेदवकीर्योत्तरामुत्तेस्तभ्नामीतिकपालेनापिधायाथानवेक्षन्प्रत्याव्रज्यापउपस्पृश्यश्राद्धमस्मै
दद्युः ॥ ५ ॥ गुरुणाभिमृताअन्यतोवापक्षीयमाणाअमावास्यायांशांतिकर्मकुर्वीरन्पुरोदयादग्निंसहभस्मानंसहायतनं
दक्षिणाहरेयुःक्रव्यादमग्निंप्रहिणोमिदूरमित्यर्धर्चेनतंचतुष्पथेन्युप्ययत्रवात्रिःप्रसव्यंपरियंतिसव्यैःपाणिभिःसव्यानू
रूनाघ्नानाअथानवेक्षन्प्रत्याव्रज्यापउपस्पृश्यकेशश्मश्रूलोमनखानिवापयित्वोपकल्पयीरन्नवान्मणिकान्कुंभानाचम
नीयांश्चशमीसुमनोमलिनःशमीमयमिध्मंशमीमय्यावरणीपरिधींश्चानडुहंगोमयंचर्मचनवनीतमश्मानंयावत्योयुवतय
स्तावंतिकुशपिंजूलान्यग्निवेलायामग्निंजनयेदिहैवायमितरोजातवेदाऽइत्यर्धर्चेनतंदीपयमानाआसतआशांतरात्रादा
युष्मतांकथाःकीर्तयंतोमांगल्यानीतिहासपुराणानीत्याख्यापयमानाउपरतेषुशब्देषुसंप्रविष्टेषुवागृहंनिवेशनंवादक्षि
णाद्वारपक्षात्प्रक्रम्याविच्छिन्नामुदकधारांहरेत्तंतुंतन्वन्नजसोभानुमन्विहीत्योत्तरस्मादथाग्निमुपसमाधायपश्चादस्यान
डुहंचर्मास्तीर्यप्राग्ग्रीवमुत्तरलोमतस्मिन्नमात्यानारोहयेदारोहतायुर्जरसंवृणानाऽइतीमंजीवेभ्यःपरिधिंदधामीतिपरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिंपरिदध्यादंतर्मृत्युंदधतापर्वतेनेत्यश्मानमुत्तरतोग्नेःकृत्वापरंमृत्योअनुपरेहिपंथामितिचतसृभिःप्रत्यृचंहुत्वायथाहा
न्यनुपूर्वंभवंतीत्यमात्यानीक्षेतयुवतयःपृथक्पाणिभ्यांदर्भतरुणकैर्नवनीतेनचांगुष्ठोपकनिष्ठाभ्यामक्षिणीऽआंज्यपरां
च्योविसृजेयुरिमानारीरविधवाःसुपत्नीरित्यंजनाईक्षेताश्मन्वतीरीयतेसंरभध्वमित्यश्मानंकर्ताप्रथमोभिमृशेदथापरा
जितायांदिश्यवस्थायाग्निनानडुहेनगोमयेनचाविच्छिन्नयाचोदकधारयापोहिष्ठामयोभुवइतितृचेनपरीमेगामनेषतेति
परिक्रामत्सुजपेत्पिंगलोनड्वान्परिणेयःस्यादित्युदाहरंत्यथोपविशंत्यत्राभिरंस्यमानाभवंत्यहतेनवाससाप्रच्छाद्यासतेस्व
पंतओदयादुदितआदित्येसौर्याणिस्वस्त्ययनानिचजपित्वान्नंसंस्कृत्यापनःशोशुचदघमितिप्रत्यृचंहुत्वाब्राह्मणान्भोज
यित्वास्वस्त्ययनंवाचयीतगौःकंसोहतंवासश्चदक्षिणा ॥६॥ अथातःपार्वणेश्राद्धेकाम्यआभ्युदयिकएकोद्दिष्टेवाब्राह्म
णान्छ्रुतशीलवृत्तसंपन्नानेकेनवाकालेज्ञापितान्स्नातान्कृतपच्छौचानाचांतानुदङ्मुखान्पितृवदुपवेश्यैकैकमेकैकस्य
द्वौद्वौत्रींस्त्रीन्वावृद्धौफलभूयस्त्वैनत्वेवैकंसर्वेषांकाममनाद्यौपिंडैर्व्याख्यातमपःप्रदायदर्भान्द्विगुणभुग्नानासनंप्रदाया
पःप्रदायतैजसाश्ममयमृन्मयेषुत्रिषुपात्रेष्वेकद्रव्येषुवादर्भांतर्हितेष्वपआसिच्यशंनोदेवीरभिष्टयइत्यनुमंत्रितासुतिला
नावपतितिलोसिसोमदेवत्योगोसवेदेवनिर्मितः ॥ प्रत्नवद्भिःप्रत्तःस्वधयापितृनिमाँल्लोकान्प्रीणयाहिनःस्वधानमऽइ
तिप्रसव्येनेतरपाण्यंगुष्ठांतरेणोपवीतित्वादक्षिणेनवासव्योपगृहीतेनपितरिदंतेअर्घ्यंपितामहेदंतेअर्घ्यंप्रपितामहेदंते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अर्घ्यमित्यप्पूर्वंताःप्रतिग्राहयिष्यंन्त्सकृत्सकृत्स्वधाअर्घ्याइतिप्रसृष्टाअनुमंत्रयेत यादिव्याआपःपृथिविसंबभूवुर्या
अंतरिक्ष्याउतपार्थिवीर्याः ॥ हिरण्यवर्णायज्ञियास्तानआपःशंस्योनाभवंत्वितिसंस्रवान्समवनीयताभिरद्भिःपुत्रका
मोमुखमनक्ति ॥ नोद्धरेत्प्रथमंपात्रंपितृणामर्घ्यपातितं ॥ आवृतास्तत्रतिष्ठंतिपितरःशौनकोब्रवीत् ॥ उद्धरेद्यदि
चेत्पात्रंविवृतंवायदाभवेत् ॥ तदासुरंभवेच्छ्राद्धंक्रुद्धैःपितृगणैर्गतैरिति ॥ ७ ॥ एतस्मिन्कालेगंधमाल्यधूपदीपा
च्छादनानांप्रदानंमुद्धृत्यघृताक्तमन्नमनुज्ञापयत्यग्नौकरिष्येकरवैकरवाणीतिवाप्रत्यभ्यनुज्ञाक्रियतांकुरुष्वकुर्वित्यथा
ग्नौजुहोतियथोक्तंपुरस्तादभ्यनुज्ञायांपाणिष्वेववाग्निमुखावैदेवाःपाणिमुखाःपितरइतिहिब्राह्मणंयदिपाणिष्वाचांतेष्व
न्यदन्नमनुदिशत्यन्नमन्नेसृष्टंदत्तमृष्भुकमितितृप्तान्ज्ञात्वामधुमतीःश्रावयेदक्षन्नमीमदंतेतिचसंपन्नमितिपृष्ट्वायद्यदन्नमु
पभुक्तंतत्तत्स्थालीपाकेनसहपिंडार्थमुद्धृत्यशेषंनिवेदयेदभिमतेनुमतेवाभुक्तवत्स्वनाचांतेषुपिंडान्निदध्यादाचांतेष्वेकै
प्रकीर्यान्नमुपवीयौस्वधोच्यतामितिविसृजेदस्तुस्वधेतिवा ॥ ८ ॥ अथशूलगवःशरदिवसंतेवार्द्रयाश्रेष्ठंस्वस्ययूथस्या
कुष्ठिपृषत्कल्माषमित्येकैकामंकृष्णमालोहवांश्चैद्रीहियवमतीभिरद्भिरभिषिच्यशिरस्तऽआभसतौरुद्रायमहादेवायजु
ष्टोवर्धस्वेतितंवर्धयेत्संपन्नदंतमृषभंवायज्ञियायांदिश्यसंदर्शनेग्रामादूर्ध्वमर्धरात्रादुदितइत्येकेवैद्यंचरित्रवंतंब्राह्मणमु
पवेश्यसपलाशामार्द्रशाखांयूपंनिखायव्रतत्यौकुशरज्जूरवाशनेअन्यतरयायूपंपरिवीयान्यतरयार्धशिरसिपशुंबध्वायूपे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रशनायांवानियुनक्तियस्मैनमस्तस्मैत्वाजुष्टंनियुनज्मीतिप्रोक्षणादिसमानंपशुनाविशेषान्वक्ष्यामःपात्र्यापलाशेनवावपांजुहुयादितिहविज्ञायतेहरायमृडायशर्वायशिवायभवायमहादेवायोग्रायभीमायपशुपतयेरुद्रायशंकरायेशानायस्वाहेतिषड्भिर्वोत्तरैरुद्रायस्वाहेतिवाचतसृषुचतसृषुकुशसूनासुचतसृषुदिक्षुबलिंहरेद्यास्तेरुद्रपूर्वस्यांदिशिसेनास्ताभ्यएनंनमस्तेअस्तुमामाहिंसीरितेत्येवंप्रतिदिशंत्वादेशनंचतुर्भिःसूक्तैश्चतस्रोदिशउपतिष्ठेतकद्रुद्रायेमारुद्रायातेपितरिमारुद्रायस्थिरधन्वनइतिसर्वरुद्रयज्ञेषुदिशामुपस्थानंतुषान्फलीकरणांश्चपुच्छंचर्मशिरःपादानित्यग्नावनुप्रहरेद्भोगंचर्मणाकुर्वीतेतिशांवत्यउत्तरतोग्नेर्दर्भवीतासुकुशसूनासुवाशोणितंनिनयेच्छ्वासिनीर्घोषिणीर्विचिन्वतीःसमश्नुतीःसर्पायएतद्वोनेनवःप्रीणात्यथोदङ्गावृत्यश्वासिनीर्घोषिणीर्विचिन्वतीःसमश्नुतीःसर्पायद्वोत्रतद्धरध्वमितिसर्पेभ्योयत्तत्रासृगूवध्यंवावस्रुतंभवंतितद्धरंतिसर्पाःसर्वाणिहवाअस्यनामधेयानिसर्वाःसेनाःसर्वाण्युच्छ्रयणानीत्येवंविद्यजमानंप्रीणातिनास्यब्रुवाणंचनहिनस्तीतिविज्ञायतेनास्यप्राश्नीयान्नास्यग्राममाहरेयुरभिमारुकोहैषदेवःप्रजाभवतीत्यमात्यानंततःप्रतिषेधयेन्नियोगात्तुप्राश्नीयात्स्वस्त्ययनइतिसएषशूलगवोधन्योलोक्यःपुण्यःपुत्र्यःपशव्यआयुष्योयशस्यइष्ट्वान्यमुत्सृजेन्नानुत्सृष्टस्यान्महापशुर्भवतीतिविज्ञायतेशंतातीयंजपन्गृहानियात्पशूनामुपतापएतमेवदेवंमध्येगोष्ठस्ययजेतस्थाली

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाकंसर्वहुतंबर्हिराज्यंचानुप्रहृत्यंधूमतोगाआनयेच्छंतातीयंजपंन्पशूनांमध्यमियान्मध्यमियान्नमःशौनकायनमःशौन
कायं ॥ ९ ॥ ॥ इत्याश्वलायनगृह्यसूत्रेचतुर्थोऽध्यायःसमाप्तः ॥ ४ ॥ इत्याश्वलायनगृह्यसूत्रंसमाप्तम् ॥ ॥

इदं पुस्तकं पणशीकरोपाह्वलक्ष्मणशर्मतनुजनुषा वासुदेवशर्मणा गोरेइत्युपनामक-
कृष्णंभट्टसाहाय्येन संस्कृतं तच्च मुंबय्यां **तुकाराम जावजी** इत्येतैः
स्वीये निर्णयसागराख्येऽकनयंत्रालये मुद्रयित्वा प्रकाशितम् ।
शाकः १८३७ सन १९१५.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2317

॥ इत्याश्वलायनगृह्यसूत्रंसमाप्तम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.01.20 11:05
,TRANSFERRED=2020/01/22 at 11:11:10
,PAGES=38
,TYPE=STD
,NAME=S0002601
,Book Name=M-2317-ASHWALAYAN GRIHSUTRA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection